# ॥ श्री विष्णुस्तुतिः ॥

श्रीमध्वसंसेवितपादपद्मं
रुद्रादिदेवैःपरिसेव्यमानम् ।
ऋष्यादिभिर्वेदपथैः सुगेयं
कथं नु पश्येयममोघवीर्यम् ॥ १ ॥

हृन्मंदिरे सुंदररत्नपीठे
लक्ष्म्यात्मके सारतरे निविष्टम् ।
श्रीभूसमाश्लिष्टतनुं तथाऽपि
पूर्णं निजानंदमयं परेशम् ॥ २ ॥

अनंतपूर्णेंदुकिरीटशोभितं
सुनीलस्निग्धालकशोभिसन्मुखम् ।
प्रत्यग्रकंजायतलोललोचनं
सुचंपकाकोरकनासिकायुतम् ॥ ३ ॥

प्रवालमध्यार्पितकुंदकोरकं
स्फुरत्कपोलद्युतिदीप्तकुंडलम् ।
केयूरभूषायुतबाहुदंडकं
सुचक्रशंखाब्जगदाविराजितम् ॥ ४ ॥

ग्रैवेयरत्नाभरणादिभूषितं
सत्कौस्तुभावेष्टितकंबुकंधरम् ।
सुवर्णसूत्रांचितसुंदरोरसं
विचित्रपीतांबरधारिणं प्रभुम् ॥ ५ ॥

करिराजकरोपमोरुयुग्मं
प्रियया सेवितजंघया समेतम् ।
वरकूर्मप्रपदेन शोभमानं
ह्यनभिव्यक्तसुगुल्फपादयुग्मम् ॥ ६ ॥

नखराजिसुपूर्णचंद्रकांत्या
नुतिमज्जनतापहारिणं रमेशम् ।
निजपूर्णसुबोधविग्रहं
परमानंदपरात्मदैवतम् ॥ ७ ॥

॥ इति श्रीविष्णुस्तुतिः ॥